वसुदेवः परिष्वज्य प्रेम्णा विह्वलो भवन् जवेति शेषः ॥३३॥३४॥ तौ कृतौ परिरम्भणं हे यशोदा च विरहशोकान् विजहतुः जजतुः यद्वा शुचः शुभ्रूणि तिज प्राप्यपि यस्याः प्रतिक्रियाव
इतुः मुमुचतुरित्यर्थः ॥३५॥ व्रजेश्वरीं यशोदां ॥३६॥ अनिवृत्तां निरंतरां निकाले ... सत्यपि स्मृतं वर्तमानां ॥ ऐन्द्रमैश्वर्यं प्राप्यपि यस्याः प्रतिक्रियाव
र्तुं न शक्यते इत्यर्थः ॥३७॥ तत्कृतां मैत्रीमाहतुः एतावितिं न दृष्टौ पितरौ याभ्यां तौ वसतत्कालं अजन्मतत्वाद्देवादृष्टपितरौ हे भवति युवयोः पित्रो

वसुदेवं परिष्वज्य संप्रीतः प्रेमविह्वलः । स्मरन् कंसकृतान् क्लेशान् पुत्रन्यासं च गोकुले ॥३३॥ कृष्णरामौ परिष्वज्य ॥
पितरावभिवाद्य च । न किंचनोचतुः प्रेम्णा साश्रुकंठौ कुरूद्वह ॥३४॥ तावात्मासनमारोप्य बाहुभ्यां परि ॥
रभ्य च । यशोदा च महाभागा सुतौ विजहतुः शुचः ॥३५॥ रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीं ॥
स्मरंत्यौ तत्कृतां मैत्रीं बाष्पकंठौ समूचतुः ॥३६॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि । अवा ॥
प्याप्यैंद्रमैश्वर्यं यस्या नेह प्रतिक्रिया ॥३७॥ एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युद ॥
यपोषणपालनानि । प्राप्योषतुर्भवति पक्ष्म ह यद्वदक्ष्णोर्न्यस्तावकुत्र च भयौ न सतां परः स्वः ॥ श्री ॥
शुक उ० ॥ गोप्यश्च कृष्णमुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति । दृग्भिर्हृदीकृत ॥
मलं परिरभ्य सर्वास्तद्भावमापुरपि नित्ययुजां दुरापं ॥३९॥

भ्यां तावतौ संप्रीणनानि निशाप्य अकुत्र च भयौ कौ चिद् पितृपरिहितौ न्यस्तावाऊ षतुः वासं चक्रतुः कथं भूतयोः अह्णोर्नेत्रयोः रक्षकं पक्ष्म यद्वत् तथा ॥ श्रीकृष्णः
रक्षकयोः युक्तं युवयोरेतत् यतः सतां परः स्वः इति नास्ति वैषम्यं ॥३८॥ अभीष्टत्वे लिंगं यस्य श्रीकृष्णस्य प्रेक्षणे दृशिषु नेत्रेषु अवधायकं प ॥ २६
क्ष्मकृतं विधातारं शपंति दृग्भिर्नेत्रद्वारैः हृदीकृतं हृदये प्रवेशितं परिरभ्य तद्भावं तदात्मतां तं प्रापुः अपि नित्यं प्रजां अस्माहृद्धं योगिनामपि अ

४० चिरायितान् विलम्बितान् अत्र हेतुः शत्रूणां पक्षस्य क्षपणे चेतो येषां तान् ४१ अपि स्विन् अस्मानवध्यायथ [illegible] जानीथ अकृतज्ञा एत इत्यादि
शंकया ईषच्छंकापान शंकामात्रं निश्चितमेवैतन् परित्यज्य गतत्वादिति चेन् अत आह नूनमिति ४२ एतत् सदृष्टांतमाह वायुरिति आक्षिपते पृथ
क् करोतीत्यर्थः ४३ अपि च अतिमहर्षिदं यद्भवतीनां मद्वियोगं न पत्रे मातिशापो जो न इत्याह मयीति मयि भक्तिमात्रमेव तावदमृतत्वाय कल्प
ते यत्तु भवतीनां मत्स्नेह आसीत् तत् दिष्ट्या अपि मद्धं कुतः मदापनः मत्प्रापक इति ४४ ईदृशः त्वं यं वयत्स्नेहेन प्राप्स्याम इत्यपेक्षायामात्मस्वं
रूपमाह अहं हीति हे अंगनाः भौतिकानां घटादीनां यथा आकाशादि पंचमहाभूतान्याद्यंतादि रूपाणि एवं सर्वभूतानां जरायुजादीनाम

॥भगवांस्तास्तथा भूता विविक्त उपसंगतः। आश्लिष्यानामयं पृष्ट्वा प्रहसन्निदमब्रवीत् ४० अपि स्मरथ नः॥
॥सख्यः स्वानामर्थचिकीर्षया गतांश्चिरायितान् शत्रुपक्षक्षपणचेतसः ४१ अप्यवध्यायथाऽस्मान् स्विदकृत॥
॥ज्ञाविशंकया नूनं भूतानि भगवान् युनक्ति वियुनक्ति च ४२ वायुर्यथा घनानीकं तृणं तूलं रजांसि च सं॥
॥योज्याक्षिपते भूयस्तथा भूतानि भूतकृत् ४३ मयि भक्तिर्हि भूतानाममृतत्वाय कल्पते दिष्ट्या यदासीन्मत्॥
॥स्नेहो भवतीनां मदापनः ४४ अहं हि सर्वभूतानामादिरन्तोऽन्तरं बहिः भौतिकानां यथा खं वार्भूर्वायुर्ज्योति॥
रंगनाः ४५ एवं ह्येतानि भूतानि भूतेष्वात्माऽत्मना ततः उभयं मय्यथ परे पश्यता

हं अतो व्यापकं मां भवत्यः प्राप्ता एवेति ४५ ननु चतुर्विधभूतग्रामाणां तद्गोत्राद्यवाघतादि रूपः तस्मिंश्च सर्वव्यापके सर्वभूतानि
वर्त्तन्ते इति कुत एव त्वत्प्राप्तिरस्माकमित्यत आह एवं हीति अयमर्थः यथा शरावादीनां भौतिकानां महाभूतान्याद्यंतादि रूपा
णि एवं सर्वभूतानां जरायुजानाम हं अतो व्यापकं मां भवत्यः प्राप्ता एवेति ५ ननु च चतुर्विधभूतग्रामाणां तद्गोत्रात्मेवाद्यंता
दि रूपः तस्मिंश्च सर्वव्यापके सर्वभूतानि वर्त्तन्ते इति कुतस्त्वत्प्राप्तिरस्माकमित्यत आह अहं हीति अयमर्थः यथा शरावादीनां भौ
तिकादीनां महाभूतान्याद्यंतद्रूपाणि [illegible] तत्त्वरूपाकारो तो भूतेषु एवं वर्तं

अंडज स्वेदज
उद्भिज्ज
जरायुज १

ना० द० ३०
॥८१॥

अध्यात्मशिक्षया स्वस्वरूपोपदेशेन शिक्षिताः बोधिताः तस्यानुस्मरणेन ध्वस्तो जीवकोशो लिंगं यासां ताः तमेवाध्यगन् प्रापुः ॥४७॥ एवं प्राप्तोऽपि हृष्ट
उत्तर्ग हृव्यासंगेन मायान्विति लक्ष्यचरणस्मरणं प्रार्थ्ययामासुरित्याह आहुश्चेति हे नलिननाभ ते पदारविंदं गेहं जुषां गृहे सेवकानामपि तो मन
नसि सदा उदीयात् आविर्भवेत् ॥४८॥ इति दशमे टीकायां द्व्यशीतितमोऽध्यायः ॥८२॥ त्र्यशीतितमे एवं च स्त्रीगणैः कृष्णकथोत्सवे द्रौप
दी कृष्णभार्याभिर्निजोद्वाहः सविस्तरः ॥१॥ अनयं कुशलं ॥१॥ तत्पादेक्षया हतमंहो येषां ते ॥२॥ महतां मनस्तः सकाशात् मुखद्वारतो निःसृतं कुत्र
कदाचिदेहंभृतां देहधारिणां देहकृत् ज्ञातावस्थितिः अविद्या तां छिनत्ति तथा तं देहंभृताः श्रवणदृष्टया ज्ञानं घट्टरेवाः कचित्त्वखोहेप्रभो

॥श्रीशुक उवाच॥ अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः। तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन्॥४७॥
आहुश्च ते नलिननाभपदारविंदं योगेश्वरैर्हृदि विचिंत्यमगाधबोधैः। संसारकूपपतितोत्तरणावलंबं गेहं जु
षामपि मनस्युदियात्सदा नः॥४८॥ इति श्रीभागवते महापुराणे दशमस्कंधे तीर्थयात्राप्रसंगे वृष्णिकुलसंगमो नाम
द्व्यशीतितमोऽध्यायः॥८२॥ श्रीशुक उवाच॥ तथानुगृह्य भगवान् गोपीनां सगुरुर्गतिः। युधिष्ठिरमथापृच्छत्स
र्वांश्च सुहृदोऽव्ययं॥१॥ त एवं लोकनाथेन परिपृष्टाः सुसत्कृताः। प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः॥२॥ कुतोऽशिवं
त्वच्चरणांबुजासवं महन्मनस्तो मुखनिःसृतं क्वचित्। पिबंति ये कर्णपुटैरलं प्रभो देहंभृतां देहकृदस्मृतिच्छिदं
॥३॥
त्वच्चरणांबुजासवं कर्णपुटैर्येऽलं पिबंति ते षां तत्र दुर्जनशंसाकालरूपात् कुतोऽशिवं भवतीत्यन्वयः कथंभूतं महात्मनां व्यासादी
नां मुखनिःसृतं कुचित् कदाचिदपि व्यासादिव्यासे स्वामात्मत्वेन जानतोऽनः दुःखं भवतीत्यर्थः नन्वीक्ष्य त्वत्पादेक्षामेव कथं तत्राह हे देहंभृ
त इति देहंभृतो जीवाः तेषां तत्र देहेन हेतुत्वेन उच्छृसंति जीवंति कोऽयं वान्यापकः प्राणपात् परैः अशोकाशश्वानंदेन स्पादिति स्फुरते अथवा ते
मुखनिःसृतं त्वच्चरणांबुजासवं पिबंति तेषां महामहात्मनां कुतोऽशिवमित्यन्वयः त्वत्तत्त्वं भगवत्कम्मस्कारकत्वायदेहंभृतां देहकृदस्मृ

श्रीद० ९०।
॥८१॥

[illegible] नताः स्मेत्यर्थः कथंभूतं आत्मधाम आत्मस्वरूपप्रकाशेन विधाता । निरस्ता आत्मकृता बुद्धिकृता निमित्तास्तिस्रो
[illegible] ऽवस्था यस्य अतएव आनन्दसंप्लवं सर्वानन्दैकस्वरूपं अखण्डं अपरिच्छिन्नं यतः नकुण्ठ नकुण्ठितो बोधो ज्ञानशक्तिर्यस्य तं नन्वेवंरूपस्य ता
श्रीकृष्णस्य कुतोऽस्मादिवद्देहप्रतीतिः अत आह । कालोपसृष्टेति कालेन उपसृष्टा विप्लुता ये निगमास्तेषामवने रक्षार्थं आत्ता उरीकृता योग
मायाया आकृतिर्निराकारा मूर्तिर्येन तं परमहंसानां गतिं त्वां आत्मलीलस्वरूपं त्वाऽस्माकं च तन्मायया एतत्सर्वं वैषयिकं त्यक्त्वा त्वामेव नताः स्मेति प

हित्वात्मधाम विधुतात्मकृतं त्र्यवस्थमानन्दसंप्लवमखण्डमकुण्ठबोधं । कालोपसृष्टनिगमावन आत्तयोगमायाकृतिं परमहंसगतिं नताः स्म ॥ ४ ॥

श्रीशुक उवाच ॥ इत्युत्तमश्लोकशिखामणिं जनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः । समेत्य गोविन्दकथा मिथोऽगृणंस्त्रिलोकगीताः शृणु वर्णयामि ते ॥ ५ ॥

श्रीद्रौपद्युवाच ॥ हे वैदर्भ्यच्युतो भद्रे हे जाम्बवति कौशले । हे सत्यभामे कालिन्दि शैब्ये रोहिणि लक्ष्मणे ॥ ६ ॥ हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयं । उपयेमे यथा लोकमनुकुर्वन्स्वमायया ॥ ७ ॥

श्रीरुक्मिण्युवाच ॥ चैद्याय मार्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरिताङ्घ्रिरेणुः । निन्ये मृगेन्द्र इव भागमजावियूथात्तच्छ्रीनिकेतचरणोऽस्तु मम मार्चनाय ॥ ८ ॥

[illegible] नताः स्म किं कृत्वा हित्वा किं आत्मधाम आत्मनाशरीरं धाम गृहं तत् च रेहं देहिकसंगं परित्यज्येत्यर्थः । समानम
वा नामिति प्रकारेणोत्तं ज्ञातव्यं त्वां नताः स्म किं कृत्वा ४ त्रिषु लोकेषु गीताः ५ कौशले हे सत्ये शैब्य मित्रविन्दे रोहिणी नाम काचित्षोडशसहस्रमहीषु तत्प्रधाना ६ हे कृष्णस्य पत्न्यः ७ मामांस्व
न्यत ४ त्रिषु लोकेषु गीताः ५ कौशले हे सत्ये शैब्ये मित्रविन्दे रोहिणी नाम काचित्षोडशमहीषु तत्प्रधाना ६ हे अन्याः श्रीकृष्णस्य पत्न्यः ७ मामांस्व
र्पयितुं संपादयितुं राजसु जरासंधादिषु उद्यतकार्मुकेषु सत्सु अजेयाः ये भटास्तेषां शेखरिता मुकुटाचरणेना अङ्घ्रिरेणुर्येन तेषां
मध्ये मृगेन्द्र इव धीत्यर्थः तस्य श्रीनिकेतस्य चरणो मम मार्चनाय लोकं ॥ ८ ॥

गो·कृ·उ·

८८

सनानेत्कीर्तुर्वधेनसिंहरूतेनतप्रहूतस्य । यस्यतेनमेनातेनलिप्तमनिशापंडुर्यश । श्वयमार्दुपरिहर्तुंकरसराजंजिमारत्नेसमंनसुपाजहार । श्यानीतवा
न । श्वपनंनतंमसिविरत्नमहात्‌ । तेनसापराधेनभीतः समेपितामजवेश्मी । जसायमादिशानदर्शे । ददौक्रूरोरिमः । प्रतिश्रुतामपीसर्षः । परिहतन
मेपिता । श्रंमंश्रीकृष्णसंजिनं । नापंसामिनंदैवमीश्वरं सीतापतिंप्रकाय । सानाविनवालानिसप्रविंशातिदिनान्यमुनाम्यधुप्यत । परीक्षितः । संज्ञानापरी

॥श्रीसत्राजितोवाच॥ योमेसनानिवधनप्रहूतातनेनलिप्तानिशापमपमार्दुमुपाजहार ॥ जिनाकरीराजमथरत्नमहातसते॥
॥नचीतः पितादिशतमांप्रजवेपिदत्तां ९ ॥जांबवानुवाच॥ प्राज्ञायदेहरूहमुंनिजनापदैवंसीनापतिंविनचलान्यमुनाम्यधु॥
॥ध्यत । साचापरीक्षितनउपाहरदर्हणंमांपारेप्रगृह्यमलिनाहमगृष्यहासी १० ॥कालिंद्युवाच॥ नपश्वरतीमांज्ञायस्वपाह॥
॥स्पर्शनाशया । सत्वोपेत्यागृहीत्वाणिंयोहंनदृहमार्जनी ११ ॥नंदोवाच॥ योमांस्वयंवरउपेत्यविजित्यसर्वान्नृमिन्येश्वसूप॥
॥गमिवात्मवलिंदिपारिः । मानंश्रमेपकृतः स्वपुरंप्रियोकसस्यालुमेनुभवमंघ्रिवनेजनत्वं १२ । श्रीकृष्णायनमः । श्रीश्री॥

[illegible] परीक्षितः । तंसात्वासीनापतिंदेवासाविनिज्ञाताया । हैप्रगृह्यमलिनासहमनार्हणमुपाहरत्‌ । श्वर्हणानयासमर्पितवान । श्वहोनहिंत्व
[illegible] सिनेत्याह । श्रमुष्याहंदासीति १ । सत्वार्जुनेन । तस्यगृहमार्जनीगृहेसंमार्जनकर्त्री ११ । मुनांसूपगनांस्ववलिंदिपारिः । सिंहइवे
[illegible] कृतः । अपकारंकुर्वनोविजितः । प्रियोकः लक्ष्मीनिवासः । तस्यांश्ववनेजनत्वंचरणक्षालनकर्तृत्वंभवतुजन्मजन्मनि १२

श्रीकृष्णः

८८

सप्रश्रयत्वात् स्वबमान् बलंच वीर्यंच प्रभावमात्मनीस्त्वामंगाथिन्यस्यति श्यपितानियेयातान् मे पित्रा स्वतान् संधः दितान् वनीपसे मां दाहं स्तिति
पानां बलस्य वीर्यस्य परिक्षेणाय तानतिप्रसिद्धान् वीक्ष्य दुर्मदः हन्तिपेतान् न त्वोशीघ्रमेव निगृह्य स्वपित्रा क्रीडन् वचो यासेनैव बंधा
जतोक्तान् नृजायस्मात् निरर३ वीर्यमेव मुत्कां दे यं यस्मात्मां दासीन्निः स हचतुरंगिणीं गजाश्वादि सेनायुक्तां ७ रं निन्ये तस्य श्रीकृष्णस्य मे दासं गृ

॥ ...सोवाच ॥ स प्रोक्तस्तेनेति बलवीर्यस्तुतीस्त्वामंगान् पित्रा कृतान् स्तितिप वीर्यपरिक्षेणाय तान्वीक्ष्य दुर्मदः हन्तुमारसा ॥
॥ निगृह्य क्रीडन् बबंध हयपाशिशवोर्जितोक्तान् ॥१३॥ स दृष्ट्वा वीर्यमुत्कां मां दासीन्निश्चतुरंगिणीं । यः पिनिर्जित्य राज ॥
॥ न्यान् निन्येत् तदास्य मस्तुमेऽर ॥ मित्रविन्दोवाच ॥ पिता मे मातुलेयाय स्वयमाहूय दत्तवान् । कृष्णे कृष्णाय तद्वि ॥
॥ नाम्ना सौहित्यपास तोजनैः ॥१५॥ अस्य मे पादसंस्पर्शो जन्मनि जन्मनि कर्मनिर्मुक्तमायया येन नश्येत् परमात्मनः ॥१६॥
॥ ...सोवाच ॥ मम पित्राश्रुतजन्मकर्माचमृतात् मुहुर्नीत्वगीत मामतृप्तं चित्तं मुकुन्दे किल पमहत्तमया रतं समुसंस्मर ॥
॥ विहाय लोकं वान् ॥१७॥ श्रीकृष्णः

स्तु ७ हे कृष्णे हे श्रोपाहि न स्मिन्ने व चित्तं यस्मात्मां मम मातौहित्यपासेन पास तोजनैश्च तद्दमे पिता कृसंश्चाहूय दत्तवान् ॥१५॥ येन पादसंस्प
र्शेन श्रात्मनो मेन तस्मै वत्स्यावेश्वेयो भवेत्तः । पद्मायेन मन्त्रारेणश्चात्मनो जीवस्य नतश्रेयः । स एव उ तथा पर्यद्भिति ॥१६॥ तन्नि हे श्रीपरिय
पामित्रविंदायां न पामममापि चित्तं मुकुंद विषयमासीत् तु संसरणतु विचार्य पमहत्तमया रतः । किलम्मनोपिमम चित्तं श्रीमुकुंदस्या सेति ॥१७॥

पार

भा. १०. उ.
२८

तत्र श्रीकृष्णप्राप्त्युपायमचीकरत् । कोऽसावुपाय इत्याह । १८ । यथा राज्ञि स्वयंवरे पार्थस्येप्सया प्राप्तुमिच्छया कृतः । तथा मत्स्यं कारितवान् । पाञ्चालेन पार्थस्येप्सुना या
कृत । तर्हि इदमप्यर्जुनस्यैव किं नाविन्ध्यत् । तत्राह । अयं तु इति । स मत्स्यो बहिरेवाच्छन्नो नान्तः । अन्तर्जले संलग्नः पोऽयं दृश्यते संलक्ष्यते । अयं तु न तथा
किं तु स्तम्भमूले निहितकटाहे केवलं दृश्यते । यतो दृष्टिरधस्तादुपरि चलत्स्वमिति श्रीकृष्णव्यतिरेकेण न कस्यापि जेय इति भावः । १९ । २० । मत्स्यं वे

॥ ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः । बृहत्सेन इति ख्यातस्तत्रोपायमचीकरत् ॥ १८ ॥ यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया ॥
कृतः । अयं तु बहिराछन्नो दृश्यते स जले परं ॥ १९ ॥ श्रुत्वैतत्सर्वतो भूपा आययुर्मत्पितुः पुरं । सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः ॥
सहस्रशः ॥ २० ॥ पित्रा संपूजिताः सर्वे यथावीर्यं यथावयः । आददुः सशरं चापं वेद्धुं पर्षदि मद्धियः ॥ २१ ॥ आदाय व्यसृजन्केचि ॥
त्सज्यं कर्तुमनीश्वराः । आकोष्ठं ज्यां समुत्कृष्य पेतुरेकेऽमुनाहताः ॥ २२ ॥ सज्यं कृत्वापरे वीरा मागधांबष्ठचेदिपाः । भीमो दु ॥
र्योधनः कर्णो नाविंदंस्तदवस्थितिं ॥ २३ ॥ मत्स्याभासं जले वीक्ष्य ज्ञात्वा च तदवस्थितिं । पार्थो यत्तोऽसृजद्बाणं नाछिनत्पस्पृ ॥
शे परं ॥ २४ ॥ राजन्येषु निवृत्तेषु भग्नमानेषु मानिषु । भगवान्धनुरादाय सज्यं कृत्वाथ लीलया ॥ २५ ॥ तस्मिन्संधाय विशि ॥
खं मत्स्यं वीक्ष्य सकृज्जले । छित्वेषुणापातयत्तं सूर्ये चाभिजिते स्थिते ॥ २६ ॥ दिवि दुंदुभयो नेदुर्जयशब्दयुता भुवि । देवाश्च कुसु ॥
॥ मासारान्मुमुचुर्हर्षविह्वलाः ॥ २७ ॥ श्रीकृष्ण ॥

धं पर्षदि संसदि मद्धियः मध्येव धीर्येषां मिति । अन्यचित्ता न वेद्धुं शक्ता इति भावः । तदेवाह । आदायेति । २१ । अमुना चापेन । २३ । नाविदंस्तदवस्थिति
मिति मागधाद्यो नाम्बष्ठ्याः शल्यादिरेव । मत्स्याभासं जितं तेष्वर्थः । २३ । यत्तो यत्नवान् । असृजत् त्यक्तवान् मुमोच । स बाणो मत्स्यं नाच्छिनत् । परं केवलं पस्पर्श ता

श्रीकृष्णः
२८

नगवस्याप्रिहर्षो निर्गरेणोस्मान मे वानुवर्तयंस्याह। वाभ्यां। नद्दंगमिति। ननहाकलौ। कलस्वनैर्नूपरैपयौता:॥ चद्रचांरंगंप्राविशं। कनकोज्ज
लोरत्नमालां निवीर्यप्रावरस्य परिधाय च नीवीबंधेन। कौशिकाग्रे उन्नमकोशेयवस्त्रे। सव्रीडेहासो यस्मिंस्तद्दरं यस्या:। साकवर्यध्विता:। म
जोपपासा। २८। उरवः कुंतलायस्मिन् कुंडलयोस्तिसोपयोर्लगंडस्थले यस्मिन् तदेवतच्च शिरः। संतापहरो हासो येषु तैः। करात्तमोहै:। स्वप
गवीस्तत्त्वविलासै:। स्वतुरक्तो हृदयं यस्या: साहं। २९। ३ हे याज्ञसेनि स्पहि। श्रीकृष्ण ईशो मया रन्तेसि। स्पर्द्धतस्पर्द्धमाना:। नन्वैवपरमेश्वर्य्या

॥ नद्दंगमाविशमहंकलनूपुराभ्यां पद्भ्यां प्रगृह्य कनकोज्ज्वलरत्नमालां। नूत्नेनिवीयपरिधायच कौशिकाग्रे सव्रीडहास॥
॥ वदनाकवरीधृतसत्कुसुमा। २८। उन्नीयवक्त्रमुरुकुंतलकुंडलत्विट्गंडस्थलं शिशिरहासकटाक्षमोक्षै:। राज्ञो निरीक्ष्य परित:॥
॥ शनैर्मुरारेरंसेनुरक्तहृदया निदधे स्वमालां। २९। तावन्मृदंगपटहा: शंखवेणुपणवानकाहया:। निनेदुर्नटनर्तक्यो ननृ॥
॥ तुर्गायकाजगुः। ३०॥ एवं वृते भगवति मयेशे नृपयूथपाः। नसेहिरे याज्ञसेनि स्पर्द्धन्तो हृच्छयार्दिताः। ३१॥ मां॥
॥ तावद्रथमारोप्य हयरत्नचतुष्टयं। शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावाजौ चतुर्भुजः। ३२॥ दारुकश्चोदयामास कांचनोपस्करं॥
॥ रथं। मिषतां भूभुजां राज्ञि मृगाणां मृगराडिव। ३३। तेन्वसज्जंत राजन्या निषेद्धुं पथि केचन। संयत्ता उद्धृतेष्वासा ग्रामसिं॥
॥ हा यथा हरिं। ३४। श्रीकृष्ण:॥

इव वनं कुतः। मद्दिव्य सरस्तत्राह हृच्छयार्दिता इति। हृच्छयेन कामेनातुरा विवशा:। कामाविर्जिता नास्पर्द्धन्त इति भाव:। ३१। हयरत्नानां चतुष्टयं यस्मिन्
तं रथं वाभ्यां मामालिंग्य वाम्यां धनुरालोग्य ह्रीनास्वचतुर्भुजस्तस्थौ। ३२। मृगाणां मिषतां मृगराडिव। तदा हरिर्जग्रामेति शेषो ज्ञातव्य:। दारुकः सेवक
गराजो यथा। ३३। न्वसज्जंत पदव... ... पथि ... यथा ... ३४। दृष्टेष्वासा:। उद्दीत

ना०६३०
८०

दर्विंधाः दर्पं नीतिर्विध्वजः । ध्वजेषु पटाः यस्यां विचित्राः शोणतोरणा नियस्यां सैव शास्त्रवतां कुशस्थलीं पुरीं यदुपतिं समाविशत् । केतुस्थलं रुतं । तत्केतनं मं
डलं अन्नलाचलं वा ॥३५॥ ३६ महार्हवाससः । प्रवृत्तिभिः सुहृद्भिः पूजयामासः ॥३७॥ तत्स्यादिभिः सह आयुधानि पूर्णाय पिनस्याद्ददौ ॥३८॥ ६ मागधैश्चैव यं

॥ निवृत्य पश्चात्कृष्णोऽपि त्वं सात्यकिना सुरः । सज्जं कृत्वा धनुर्दिव्यं प्रवर्षञ्छरैर्नृपान् ॥३५॥ ते शार्ङ्गच्युतबाणौघैः कृत्तबाहूङ्घ्रि ॥
॥ कंधराः । निपेतुः प्रधने केचित् एके संत्यज्य दुद्रुवुः ॥३५॥ ततः पुरीं यदुपतिरत्यलंकृतां रविच्छदध्वजपटचित्रतोरणां । कु ॥
॥ शस्थलीं दिवि भुवि चाभिसंस्तुतां समाविशत्तरणिरिव स्वकेतनं ॥३६॥ पिता मे पूजयामास सुहृत्संबंधिबांधवान् । महा ॥
॥ र्हवासोऽलंकारैः शय्यासनपरिच्छदैः ॥३७॥ दासीभिः सर्वसंपद्भिर्भटेभस्यंदनवाजिभिः । आयुधानि महार्हाणि ददौ पूर्णस्य ॥
॥ भक्तितः ॥३८॥ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः । सर्वसंगनिवृत्त्याद्धा तपसा च बभूविम ॥३९॥ महिष्य ऊचुः ॥
॥ भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथ नः क्षितिजये जितराजकन्याः । निर्मुच्य संसृतिविमोक्षमनुस्मरंतीः पदंबु ॥ प्र १
॥ जं परिणिनाय य आप्तकामः ॥४०॥

सर्वसंगनिवृत्त्या तपसा स्वधर्मेणाश्रमात्ता तस्य गृहदासिका बभूविम ॥३९॥ क्षितिजये दिग्विजये जितानां राज्ञां कन्या नः अस्मान् तेन रुद्धा ज्ञात्वा ॥ श्रीरामः ॥
ततो निर्मुच्य संसृतेर्विमोक्षोपायमात् । तत्पदांबुजं अनुस्मरंतीर्नः परिणिनाय ॥ उद्धृत्य ताः प्रकामोऽपि यः ॥४०॥ श्री ॥८

नवयमिति साम्राज्यादि न कामयामहे किंतु एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति ननु नसेगहितोऽपूर्वं सर्वसंपद्भजः किमेवं का
म्यते आहुः हे साध्वि साम्राज्यं सार्वभौमं पदं स्वाराज्यमैंद्रपदं भोज्यं तदुजयभोगजो... विविधं राजन इति विराट् तस्य भावो वैराज्यं त्वणिमादिसिद्धि
जातं त्वमित्यपरे पारमेष्ठ्यं ब्रह्मपदं आनंत्यं मोक्षं हरेः पदं तत्सालोक्यादि न तु कामयामह इति ४१ यद्वा बहुं च ब्रह्मलोकक्रमेण प्राग्गादिरिक्तु
चतुष्पाधिपत्यानि साम्राज्यं भोजस्वाराज्यभोज्यानि यथाविध्यानि तत्किं पादरज एव काम्यते अत आहुः श्रियः कुच कुंकुमगंधाढ्यमिति

॥ न वयं साध्वि साम्राज्यं स्वाराज्यं भोज्यमप्युत । वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः पदं ॥४१॥ कामयामह एतस्य श्रीमत्पा॥
॥ दरजः श्रियः । कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥४२॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः । गावश्चारय॥
॥ तो गोपाः पादस्पर्शं महात्मनः ॥४३॥ इति श्रीभागवते महापुराणे दशमस्कंधे त्र्यशीतितमोऽध्यायः ॥८३॥ श्रीशुक उवा॥
॥च॥ श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः । कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं॥
॥ सर्वा विसिस्म्युरलमश्रुकलाकुलाक्ष्यः ॥१॥ इति संभाष्यमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु । आययुर्मुनयस्तत्र कृष्णरामदिदृ॥
॥क्षया ॥२॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः । विश्वामित्रः शतानंदो भरद्वाजोऽथ गौतमः ॥३॥ श्रीकृष्णाय नमः श्रीराम॥

ब्रह्मादिसेव्याः श्रियापि सेवितं तत्पादरेणुं भावः ननु नार्हसि पति दुर्लभं नाकिं तद्वांछ्यात आह व्रजस्त्रिय इति ४२ यत्र य पा गावः गाः मह
त्मनोपि गाश्चारयतः पादस्पर्शं गोपा यथावांछंतितद्वत् तस्य तृणं गुल्मं इति भावः ॥४३॥ इति त्र्यशीतितमोऽध्यायः ॥८३॥ चतु
र्शीतिधिकाशीतितमे मुनिसमागमे वसुदेवमखोत्साहं वंधुप्रस्थापनादिकं ॥ सुबलस्य पुत्री गांधारी माधवी सुभद्रा क्षितिपानां राज्ञां पत्न्यः स

भा०द०
८१

आनर्चुः पूजितवंतः ।६।७ धर्मगोप्त्री तनुर्यस्य स धर्मगुप्तनुः यतानि यतानि वाक्पस्य स इत्यतः शृण्वतः ८ जन्मभृतः सफलजन्मानः तत्फलं जन्मफलं किं तत् यत्
योगेश्वरदर्शनं किंच पुण्यात्मकं दर्शनमेवेतानारेदेवानामपि दुःप्राप्यं अस्माकं तु स्पर्शनादिकमपि कथं नु घटितमिति विस्मयेनाह किमिति ९ स्वल्पतपसां
स्पर्शनादिमात्रेण यो बुद्धिर्येषां तेषां अर्चायां देवप्रतिमायां देवशति चक्षुर्येषां तेषां योगेश्वरस्य दर्शनादिकमिदं किं कथं संभावितमित्यर्थः एतत्र पंचपतितिलिः

	रामः सशिष्यो भगवान् वशिष्ठो गालवो भृगुः	पुलस्त्यः कश्यपोऽत्रिश्च मार्कंडेयो बृहस्पतिः ४ द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्र	
|स्तथांगिराः	अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ५ तान् दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः	पांडवाः कृष्णरामौ च|
	प्रणेमुर्विश्ववंदितान् ६ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत्	स्वागतासनपाद्यार्घमाल्यधूपानुलेपनैः ७ उवाच सु	
|खमासीनान् भगवान् धर्मगुप्तनुः	सदसस्तस्य महतो यतवाचोनुशृण्वतः ८ श्रीभगवानुवाच || अहो वयं जन्मभृ|
|तो लब्धं कार्त्स्न्येन तत्फलं	देवानामपि दुःप्रापं योगेश्वरप्रदर्शनं ९ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां	दर्शनस्प|
	र्शनप्रश्नप्रह्वपादार्चनादिकं १० न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः	ते पुनंत्युरुकालेन दर्शनादेव साधवः	
	११ नाग्निर्न सूर्यो न च चंद्रतारका न भूर्जलं खं श्वसनोथ वाङ्मनः	उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहू	
	र्तसेवया १२	

१० अम्मयानि तीर्थानि न इति नकिंतु तीर्थादिचिन्जनं सेवपरंतु उरुकालेन फलं ति साधवः दर्शनादेव ११ वाङ्मनसयोरप्युपासनाविषयत्वं
ब्रह्मोपासनाद इति श्रुतेः अयथन्यदलं मज्ञानं न हरंति अत्र हेतुः भेदकृतः भेरकर्तारः यदा भेदबुद्धिं कुर्वतः पुंसः विपश्चितो निरस्तभेदात् ते तु मुहू
र्तमात्रसेवयोऽपघ्नंतीति १२ श्री

श्री हस्तः
८१

...पुष्पात्स्वजमानो तिमंदस्याह यस्येति आत्मबुद्धिः रहमितिबुद्धिः त्रयो धातवो वातपित्तश्लेष्माणः प्रकृतयो यस्य त
स्मिन् कुणपे शरीरे स्वधीः स्वीया इति बुद्धिः भौमे भूविकारे इज्यधीः देवताबुद्धिः तीर्थमितिबुद्धिः अभिज्ञेषु तत्त्ववित्सु यस्य ताः यो न भजति स एव
गो खर इव ... तृणं अस्य विवेकी यद्वा गवां तृणादिभारवाहः खरो गर्दभ इति १३ दुरन्वयं अननुरूपं त्वमंतो अनवस्थिता धीर्बुद्धिर्येषां ते
१४ ईशितव्यतां अनीश्वरतादिकर्माधिकारितां जनसंग्रहमात्रमेतदित्यूचुः स्मयंतः हसंतः अननुरूपविडंबनं तच्चाहुः यन्मायया येति

॥यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव
॥गोखरः १३॥श्रीशुक उवाच॥ निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः । वचो दुरन्वयं विप्रास्तूष्णीमासन् भ्रमद्धियः॥
१४ चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां । जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं॥१४॥मुनय ऊचुः॥ यन्मायया तत्त्ववि
॥दुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः । यदीशितव्यायति गूढ ईहया अहो विचित्रं भगवद्विचेष्टितं॥१५॥अनीह एत
॥द्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा । भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं॥१७ श्री॥

१५ तत्त्वविदुत्तमा अपि वयं कालतो मायया विमोहिता इति तमाहुः यदिति यत् यस्मात् ईहया नरचेष्टितेन गूढः सन् ईशितव्यायति
अनीश्वरवदाचरतीति भवान् ननु हमीश्वर एवेति किमित्येवमाचरेयं तत्राहुः अहो इति भगवतस्तव चेष्टितं विचित्रं अतस्तस्मिन् भगवत्येवमाहुः
अनीह इति १६ अनीहः अक्रियः एक एव आत्मना स्वरूपमात्रेण बहुधा तत्र दृष्टांतः यथा भौमैरिति भौमैर्घटादिविकारैरुपलक्षिता बहु
॥हं जन्मादिचरितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति १६ श्री

भा०द०उ०
८२

जनसंग्रहमाहुः। अथापीति त्रिभिः। सत्त्वं शुद्धसत्त्वात्मकं रूपं बिभर्षि स्वलीलया। आचारेण वेदपथं च बिभर्षि अत एव ब्राह्मणेषु बहुमानं करोषी
ति सहेतुकमाहुः। ब्रह्मेति। १९। ब्रह्म वेदरूपं ते शुक्लं शुद्धं ते हृदयं अन्तरंगरूपं कुत इत्यत आहुः। यत्रेति। यत्र ब्रह्मणि व्यक्तं कार्यं अव्यक्तं कारणं ततः
परं सत्। तस्मात् ब्रह्म च तपआदिभिरुपलब्धं तत्त्वं ब्रह्म। १८। तस्माद्वेदप्रवर्तकं ब्राह्मणकुलं शास्त्रयोनेर्वेदप्रमाणकस्य तव स्वधाम श्रे
ष्ठमुपलब्धिस्थानं सभाजयसि संपूजयसि तत्तस्मादेव कारणात्। त्वं ब्रह्मण्यानामग्रणीर्मुख्यः। तत्प्रवर्तकः सत्कर्मी च त्वमित्यर्थः। तस्मादीशा

॥ अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्त्वं खलनिग्रहाय च। स्वलीलया वेदपथं सनातनं वर्णाश्रमात्मा पुरुषः परो भ
वान्॥ १८॥ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः। यत्रोपलब्धं सद्व्यक्तमव्यक्तं च ततः परं॥ १९॥ तस्माद्ब्रह्मकुलं ब्रह्मन्
शास्त्रयोनेस्त्वमात्मनः। सभाजयसि सद्धाम तद्ब्रह्मण्याग्रणीर्भवान्॥ २०॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः॥
त्वया संगम्य सद्गत्या यदन्तः श्रेयसां परः॥ २१॥ नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे। स्वयोगमाययाच्छन्नमहि
म्ने परमात्मने॥ २२॥ न यं विदन्त्यमी भूपा एकारामाश्च वृष्णयः। मायाजवनिकाच्छन्नमात्मानं कालमीश्वरं॥ २३॥ य
था शयानः पुरुष आत्मानं गुणतत्त्वदृक्। नाममात्रेन्द्रियाभातं न वेद रहितं परं॥ २४॥ श्रीकृष्णाय नमः। श्रीकृष्णाय॥

स्वजनेषु जनसंग्रहमात्रं च यं तु तव संगत्या कृतार्था इत्याहुः। अद्येति त्रिभिः। २०। सतां संगत्या त्वया संगम्य सत्संगं प्राप्य यत् यतः यस्मात् श्रेय
सां परोऽवधिः। २१। एकस्मिन्नेव त्वय्यात्मन्यारामो येषां तेऽपि कालं सृष्ट्यादिकारिणं ईश्वरं नियन्तारं एतत्सहेतुकं तमाहुः। यथेति। २३। शयानः
स्वप्नान् पश्यन् गुणतत्त्वदृक् स्वप्नविषयेषु तत्त्वदृष्टिः नाममात्रेन्द्रियेण मनसा भासमानं सिंहव्याघ्रादिरूपं आत्मानं वेत्ति रहितं देह

श्रीकृष्णः॥
८२

एवं त्वां नाममात्रेषु स्वप्नादिवत्तुल्येषु विषयेषु इंद्रियैर्या ईहा प्रवृत्तिः सैव माया या विभ्रमाच्छिन्नो न वेद स्मृतेर्विवेकस्योपप्लवान्नाशात् २५ अघौघम
र्षं नशं करोतीति यद्गंगाख्यं तीर्थं तस्यास्पदं मांघ्रिं स्वयं ते हृदि सुपक्वयोगैरपि हृदि कृतं केवलं न तु दृष्टं तस्य ते अंघ्रिं ददृशिम दृष्टवंतो वयं बहुभिः
७ तपेः स्वतोस्मान्नत्वाननुगृहाण भक्तान्न ह्यनुग्रहं कुर्वित्यर्थः न च किं भक्त्या यथा पूर्वं तप एव तप्स्यामिति नेत्याहुः उत्सिक्तया

॥ एवं त्वां नाममात्रेषु विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्छिन्नो न वेद स्मृत्युपप्लवात् २५ तस्याद्य ते ददृशिमांघ्रिम ॥
॥ घौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः । उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथोनुगृहाण ॥
॥ भक्तान् २६ श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं । राजर्षे स्वाश्रमान्गंतुं मुनयो दधिरे मनः २७
॥ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः । प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः २८ ॥ श्रीवसुदेव उवाच ॥ नमो वः सर्व ॥
॥ देवेभ्यः ऋषयः श्रोतुमर्हथ ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां २९ ॥ श्रीनारद उवाच ॥ नातिचित्रमिदं विप्रा ॥
॥ वसुदेवो बुभुत्सया ॥ कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः ३० ॥ संनिकर्षोत्र मर्त्यानामनादरणकारणं ॥ गांगं हि ॥
॥ त्वा यथान्यांभस्तत्रत्यो याति शुद्धये ३१ ॥ श्रीवत्साय ॥ दामोदराय ॥ श्रीगोपालजी शाहय ॥ श्री काशिकावासीनमः ॥

भक्त्या उपहतः प्राप्तनाशः लिंगो जीवकोशो येषां त एव पूर्वे भगवद्गतिमापुस्तान्न इति २६ २७ उपसंगृह्य चरणौ पाणिभ्यां धृत्वा बभाषे इदमिति
संधिरार्षः २८ सर्वदेवमयेषु तेभ्यः यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंतीति श्रुतेः येन कर्मणा यथाकृतेन च कर्मणां निर्हारो नि
शेषेण नाशः भवति तदुच्यतां २९ श्रीकृष्णहिता स्मान्नः पृच्छतीति विस्मितान्प्रत्याह नारदः नातीति बुभुत्सया बोद्धुमिच्छया ३० मत्रत्यः गंगातीरवासी ३१ ॥

भा॰द॰उ॰
८३

श्रीकृष्णोऽर्भकत्वाभावेनैव विद्याविद्ये भिन्नत्याह यस्येति ॥ द्वाभ्यां ॥ यस्यानुभूतिर्ज्ञानं कुतश्चिदपि न रिष्यति न नश्यति ॥ तर्हि कथं ॥ कालेन अर्कादिकाफलवत्
स्य विशस्य स्वलयपोत्पत्त्यादिनापि ॥ स्वत एव विद्युदादिवत् ॥ अन्यस्माच्च मुद्गरादिवत् ॥ घटादेः ॥ गुणतो हृष्यां तरोत्पन्ने ॥ न मे वं कुतश्चिदप्यवा
हतानुभवं ३२ ॥ अत एवेश्वरं ॥ किंच ॥ अद्वितीयं कुलं ॥ अन्यः ॥ प्राकृतः ॥ उपगूढमाच्छन्नं मनुष्यं मन्येते ॥ तैः ॥ क्लेशकर्मादिभिः ॥ तत्र क्लेशा रागादय
स्तन्मूलानि कर्माणि च तत्परिपाके ॥ सुखदुःखे च सत्वादिगुणानां पुनः प्रवाहस्तैः ॥ प्राणादिभिश्च स्वविभवैः ॥ स्वकार्यैः ॥ अत्र दृष्टान्तः ॥ अत्र तु

॥ यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै ॥ स्वतोऽन्यस्माच्च गुणतो न कुतश्चन रिष्यति ३२ ॥ तं क्लेशकर्मपरिपाकगुण ॥
॥ प्रवाहैरव्याहतानुभवमीश्वरमद्वितीयं ॥ प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्येत सूर्यमिव मेघहिमोपरागैः ३३ ॥
॥ अथोचुर्मुनयो राजन्नाभाष्यानकदुन्दुभिं ॥ सर्वेषां शृण्वतां राज्ञां तथैवाऽच्युतरामयोः ३४ ॥ कर्मणा कर्मनिर्हार एष सा ॥
॥ धुनिरूपितः ॥ यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ३५ ॥ चित्तस्योपशमोऽयं वै कविभिः शास्त्रचक्षुषा ॥ दर्शितः सुग ॥
॥ मो योगो धर्मश्चात्ममुदावहः ३६ ॥ अयं स्वस्त्ययनः पंथा द्विजातेर्गृहमेधिनः ॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पूरुषं ॥
॥ ३७ ॥

भावः ॥ रागादिभिः ॥ स्वविभवैः ॥ सूर्यमिवेति ३३ ॥ ३४ ॥ ३५ ॥ चित्तस्योपशमः ॥ उपशमहेतुः ॥ योऽसौ मोक्षोपायश्च ॥ शास्त्रैरात्ममुदावहतीति ॥ न पासुगमः ॥
प्रवृत्त्याश्रयत्वात् ॥ धर्मश्चावश्यकः ॥ अन्यथा विहिताकरणेन मालिन्यप्रसंगात् ॥ ननु कर्मणा प्रजया धनेन त्यागेनैके अमृतत्वमानशु
रित्यादिना त्यागस्यैव विहितत्वात्कथं ॥ कर्म मोक्षोपाय इत्याशंक्य ॥ श्रातवेत्त्यागस्याशंसत्वादित्याशयेनाह ॥ अयमिति सार्द्धचतुर्भिः ॥
३८ ॥ स्वस्त्ययनः ॥ क्षेमः ॥ ईयते ॥ नेनेति ॥ तथा श्रद्धयाभिः ॥ कामनया शुद्धेन ॥ आप्तेन वित्तेन पुरुषं ईश्वरं यजेतेति यत् ॥ एष पंथाः ३७ ॥ श्री

॥ श्रीकृ...॥
८३॥

[illegible] कृष्णात [illegible] श्यां अनुजो विदुरः पार्थो युधिष्ठिरो भीमार्जुनौ यमौ नकुलसहदेवौ [illegible] हृदेनालिंग्य [illegible] देवांते ५८
मनोप्येषमविषयः तमेव महार्णवः ५९ मूढानां बलेन योगिनां ज्ञानेनापीत्यर्थः तत्कृतलाभः अस्मान्निति ६१ कृतान्नेषु सुकृतमुपकारमजानतु
सत्सु मैत्र्यं चावद्भिः प्रतिकल्पानुपमा मैत्री यमर्पिता अफलापि प्रसुका [illegible] पि कर्हिचिद्यद्यस्मान्निवर्तते न स्माही [illegible] तः [illegible] पोयं मवत्ता

॥धनराशृङ्ग अर्जुनः पार्थो भीमोऽनिलः पश्यापमौ नारदो भगवन्व्यासः सुहृत्संबंधिबांधवाः ५७ वंधून्परिष्वज्य यदून्सौहृद॥
॥क्लिन्नचेतसः यदुपुरिरहत्नेष्वेशा स्वरेशं श्वापरे जनाः ५८ नंदस्तु सह गोपालैर्दृष्टस्यापूजयार्चितः कृष्णरामो [illegible] यसेनाद्यैश्च॥
॥वासीदं धुवत्सलः ५९ वसुदेवोजसोजीय मनोरूपमहार्णवं सुहृत्तः प्रीतमनानंदमाहाक्रूरेश्वशत्त्वाः ६० श्रीवसुदेव उवा॥
॥च॥ भ्रातरीशः कृतः पाशो नृणां यः स्नेहसंज्ञितः तं दुस्त्यजमहं मन्ये शूराणामपि योगिनां ६१ अस्मास्वप्रतिकल्पेयं॥
॥यत्कृतान्नेषु सत्तमैः मैत्र्यर्पिताफला चापि न निवर्तेत कर्हिचित् ६२ प्रागकल्पाच्च कुशलं भ्रातर्वो नाचराम हि अधुना॥
॥श्रीमदांधाक्षा न पश्यामः पुरः सतः ६३ मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद स्वजनानुत वंधून्वा न पश्यति य॥
॥यांधदृक् ६४ एवं सौहृदशैथिल्यचित्त आनकदुंदुभिः रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः ६५ श्रीकृष्णायनमः॥

मितिगम्यते इत्यर्थः अकल्पनमेवाह ६२ मानिनि हे भ्रातः अकल्पात् असमर्थत्वात् वः कुशलं प्रियं न हि आचराम न कृतवंतो वयं श्रीम
॥देनांधा न्यस्तीणि येषां ते ६३ राज्यश्रीर्माभूत् पांसो डागमः ६४ श्रीकृष्णः श्रा

अद्यश्व इति आतर्निर्गमे श्वो वा परतो हे गम्यतामिति अपरतो हे निर्गमे श्वो पगम्यतामिति पुनः पुनरेवं मानितः ६६ यापितः महता स्नेहेन प्रस्थापि
तः ६७ ६८ ६९ ७० यदुदेवस्य वसुदेवस्य महोत्सवं यत्राशीत् तत्रत्यं सुहृत्संदर्शनादिकं चेति ७१ इति दशमे चतुराशीतितमोध्यायः ॥ ८४ ॥ पंचाशी

॥ नंदस्तु सख्युः प्रियकृत्प्रेम्णा गोविंदरामयोः अद्यश्व इति मासांस्त्रीन् यदुभिर्मानितोवसत् ६६ ततः कामैः पूर्यमाणः स॥
॥व्रजः सहबांधवः परार्घ्याभरणक्षौमनानानर्घपरिछदैः ६७ वसुदेवोग्रसेनाभ्यां कृष्णोद्धवबलादिभिः दत्तमा॥
॥दाय पारिबर्हं यापितो यदुभिर्ययौ ६८ नंदगोपाश्च गोप्यश्च गोविंदचरणांबुजे मनः क्षिप्तं पुनर्हर्तुमनीशा मथु॥
॥रां ययुः ६९ बंधुषु प्रतियातेषु वृष्णयः कृष्णदेवताः वीक्ष्य प्रावृषमासन्नां ययुर्द्वारवतीं पुनः ७० जनेभ्यः कथ॥
॥यांचक्रुः यदुदेवमहोत्सवं यदासीत्तीर्थयात्रायां सुहृत्संदर्शनादिकं ७१ यद्दंकीर्तयेन्नित्यं शृणुयाद्वापि नित्यतः॥
॥श्रवणात्रयविनिर्मुक्तो गोविंदस्य प्रियो भवेत् ७२ इति श्रीभागवते महापुराणे दशमस्कंधे तीर्थयात्रानुवर्ण॥
॥ने चतुराशीतितमोध्यायः ॥ ८५ ॥ श्रीशुक उवाच ॥ अथैकदात्मजौ प्राप्तौ कृतपादाभिवंदनौ वसुदेवोभिनंद्याह॥
॥प्रीत्या संकर्षणाच्युतौ १ मुनीनां च वचः श्रुत्वा पुत्रयोर्धामसूचकं तद्वीर्यैर्जातविश्रंभः परिभाष्याभ्यभाषत २ श्री॥

तितमे रामकृष्णौ संप्रार्थितौ सुतौ पितृज्ञानमयो मात्रे मृतान्सुतानानयद्धतां १ नंदयित्वा कृतहेतौ यात्रायां सुहृदो वृहन् तत्राज्ञानं ततः
पिष्टो दिशान्यतत्स्तुतिः २ धामप्रभावस्तत्सूचकं जातविश्रमः उत्पन्नविश्वासः परिभाष्य संबोध २ श्रीकृष्णाभ्यां नमः श्री

॥ श्रीकृष्णः ॥
॥ ८२ ॥

अस्य वां वस्य यत्साक्षात्स्वरूपं तत्कारणं प्रधानपुरुषौ नाम परौ तयोरपि कारणत्वेनेश्वरौ च साक्षाद्युवामिति जाने न्विदं विश्वं मन्ये कैः कारकै
र्क्रियमाणं कुतः प्रधानपुरुषात्मकं कुतस्तत्राभावयोः कारणत्वेनेश्वरत्वं तत्राह यत्रेति ३ यत्राधिकरणे येन कर्त्रा करणेन वा यतो पादान
वसुदेव उवाच। त्त यस्य संबंधेन वस्यार्थं यस्य कारणत्वे पि निमित्ततोक्ता यस्मै संप्रदानाय यद्यदिति प्रयोज्यकर्तृ कर्म कारके दर्शिते ननु तयोर्नाशित्वेन यथो
क्ते करोति क्रियमाणेन न कश्चित्कर्मणा विना नवस्य सर्वस्य कर्त्ता च करोतेः कर्म जायते न यथा करोत्स्य सर्वस्य कर्त्ता न चिंतु सप्रयोजक आ

कृष्ण कृष्ण महायोगिन् संकर्षण सनातन जाने वामस्य यत्साक्षात्प्रधानपुरुषौ परौ ३॥
॥यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा ॥ स्यादिदं भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ ४॥
॥एतन्नानाविधं विश्वमात्मसृष्टमधोक्षजः आत्मनानुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यज ५॥

स १

चिंता नमस्कृत्य प्रयोज्यतं प्रपद्यते इति च समस्तं तथाप्यवस्थाने देनमेदो विवक्षितः दृश्यते चावस्थाभेदः संदुलानोदनं पचति मृद्घटं करो
तीति तदेवं सम्प्रदि नमस्यार्थो दर्शितः यथेति यदेति च क्रियाविशेषणत्वेनान्नानामन्येषां चाव्ययानामर्थः स्यादिति क्रियापदार्थोपलक्षणं॥
एवं सर्वं पंचमहद्भूतात्कारणेन भगवद्रूपतां विधत्ते इदं साक्षादिति प्रधानं नेगंधं पुरुषो नो कांतयोरीश्वरो न भगवांस्त्वमेव साक्षादिति त
योर्भेदेन्न तिप्रत्येक वचनं किंच साधारणे पोषणं कर्त्रपित्वमेवेत्याह एतदिति ४ हे आत्मन् प्राणः क्रियाशक्ति जीवो ज्ञानशक्तिरूपस्तन्

ननुप्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्यत इत्याशंक्य प्राणादिशक्तयोपि तस्यैवेत्याह प्रा-
णादीनामिति प्राणः सूत्रं तदादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः परस्य परमकारणस्येश्वरस्यैव कुतः पारतंत्र्यात् यथा वेध-
शक्तिर्न बाणस्य अपितु पुरुषस्य तद्वदित्यर्थः ननु भगवतः प्राणादिवत्स्वातंत्र्यमेव किं न स्यात् अत आह वैसादृश्यात् द्वयोरिति
चेतनाचेतनत्वेन विसदृशत्वात् द्वयोश्चेतनत्वे चेतनपारतंत्र्यमेव युक्तमित्यर्थः यद्वा प्राणादिषु द्वयोर्द्वयोरेवानावद्विसदृशत्वं वित-

॥ प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥ पारतंत्र्याद्वैसादृश्याद्द्वयोश्चेष्टैव चेष्टतां ॥ ६ ॥

द्धक्रियाकारित्वात् किंच नर्वहुनां तस्मादेकेन सर्वज्ञेन सर्वज्ञशक्तिनाधिष्ठितानामेव विशिष्टकार्यारंभकत्वं युक्तं न स्वतंत्राणामिति
तथाचोक्तं यदैते संहता नानात्वात्तेंद्रियमनोगुणाः यदायतननिर्माणे न शेकुर्ब्रह्मवित्तमः तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः सद-
सत्वमुपादाय चोभयं ससृजुर्ह्यद इति तथा नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो जिविमित्यादिना नु प्राणादीनां क्रियाकारित्वं शास्त्र-
त्वावेकुतः स्यादत आह चेष्टैव चेष्टतामिति चेष्टमानानामेषां चेष्टैव न शक्तिः यथा वायोः शक्त्या तृणादीनां चलनं यद्वा तद्वस्यशक्त्याशक्तानां

स्तेन सुतयोरावयोः किमित्यपरोक्ष्यते अत आह युवामिति भूभारक्षत्रक्षपणार्थं अवतीर्णौ निश्चितं अ कथयसि।१८। न ते अस्मादरणं शरणमाप
न्नानां संसृतिभयापहं नीतिति तथापि तत् ननु त्वमिति सुखी यथा किं निर्विद्यसे अत आह एतावतेति इंद्रियलालसेन इंद्रियार्थलालसायापघ्नेनेंद्रि
यलालसेन मर्त्ये शरीरे आत्मदृक् आत्मबुद्धिर्यस्य अहं त्वयि च परमेश्वरे अपत्यबुद्धिरस्मि तेनालं पर्याप्तमिति ननु कुत एतत् अहं परमेश्वर इति तत्र

॥युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ भूभारक्षत्रक्षपण अवतीर्णौ तथात्थ ह।१८। न ते गतोस्म्यरणमद्य पदारविंदमा॥
॥पन्नसंसृतिभयापहमार्त्तबंधो एतावतालमलमिंद्रियलालसेन मर्त्यात्मदृक् त्वयि परे यदपत्यबुद्धिः।१९। सूतीगृहे न॥
॥नु जगाद भवानजो नौ संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै नानातनूर्गगनवद्विदधज्जहासि को वेद भूम्न उरुगाय विभू॥
॥तिमायाः।२०॥ श्रीशुक उवाच॥ आकर्ण्येत्थं पितुर्वाक्यं भगवान्सात्वतर्षभः प्रत्याह प्रश्रयानम्रः प्रहसन्श्लक्ष्णया गि॥
॥रा।२१॥ श्रीभगवानुवाच॥ वचो वः समवेतार्थं तातैतदुपमन्महे यन्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः।२२। अ॥
॥हं यूयमसावार्य इमे च द्वारकौकसः सर्वेप्येवं यदुश्रेष्ठ विमृग्याः सचराचरं।२३। श्री॥

आह सूतीगृह इति।२०। अनुयुगं प्रतियुगं यदा सुतपाः पृश्निरिति युग्मं नौ आवयोः यदा च कश्यपो दितिश्चेति युग्मं अधुना च वसुदेवो देव
की युग्मं अज एवाहं संयज्ञ अवतीर्ण इति भवान जगाद ननु नानासौ चतुर्भुजो देव इति तत्राह नानातनूरिति गगनवद्यसौ एवं तत्र ... सर्व
गतस्य विभूतिरूपा मायाको वेद न कोपीत्यर्थः।२०।२१। उपमन्महे उपमन्यामहे समुद्दिश्य विषयीकृत्य तत्त्वग्रामस्तत्त्वसमूह उदाहृतः सम्यक्

॥ भा॰द॰उ॰ ॥
॥ ९८ ॥

मनुनानाविनाशेन तां कुतो वृत्तलं तं तन्नाह । वृत्तलेनैकोपाधि ह्युपाधिर्हि यथा प्रनीति दिति सदृशां तमाह द्वाभ्यां आत्महीति । यथा व्योमादि भूतानि तत्स्थ्वे तेषु घटा
दिष्या विलि रोत्नावादि यांति एव मसावात्मापि आत्मसृष्टेष्वगुणैः स्वनानात्वमेते ष्वदेहेषु वपुर्धार्यते ३ न अपयाशयं यथायाधिः आविर्भा
वति रोत्नावादिरूपेण प्रतीयते न वस्तुतः कुतः एकोवपुधात्त्वयं ज्योतिर्दृश्यतेन न तिरोनिरुपत्वेन अन्योन्यत्वेन निर्गुणः सगुणत्वेनेत्यादिवपु
॥ आत्माह्येकः स्वयंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः । आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ २४ ॥ खं वायुर्ज्योतिरापो भूस्तत्कृतेषु
॥ यथाशयं । आविस्तिरोल्पभूर्येको नानात्वं यात्यसावपि ॥ २५ ॥ शुक उवाच ॥ एवं भगवता राजन्वसुदेव उदाहृतं श्रुत्वा विन
॥ ष्टनानाधीस्तूष्णीं प्रीतमना अभूत् ॥ २६ ॥ अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता श्रुत्वानीतं गुरोः पुत्रमात्मजाभ्यां सुविस्मिता ॥
॥ २७ ॥ कृष्णरामौ समाश्राव्य पुत्रान्कंसविहिंसितान् स्मरंती कृपणं प्राह वैक्लव्यादश्रुलोचना ॥ २८ ॥ देवक्युवाच ॥ राम रामा
॥ प्रमेयात्मन्कृष्ण योगेश्वरेश्वर वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ ॥ २९ ॥ कालविध्वस्तसत्त्वानां राज्ञामुच्छास्त्र
॥ वर्तिनां भूमेर्भारायमाणानामवतीर्णौ किलाद्य मे ॥ ३० ॥ यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः ॥ भवंति किल विश्वा
॥ त्मंस्तं त्वाद्याहं गतिं गता ॥ ३१ ॥ चिरान्मृतसुतादाने गुरुणा किल चोदितौ ॥ आनिन्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणां ॥
॥ ३२ ॥ तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ ॥ भोजराजहतान्पुत्रान्कामये द्रष्टुमाहृतान् ॥ ३३ ॥ श्रीरसायनमः ॥

धात्वं प्रपंचनीयं ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ सुविस्मिता सती समाश्राव्य संबोध्य ॥ २८ ॥ भूमेर्भारायमाणानां राज्ञामर्थे तेषां निधनार्थं मे मयि किलावतीर्णौ हे
आद्य ॥ २९ ॥ ३० ॥ यस्यांशः पुरुषस्तस्यांशो मायायास्तस्यांशः गुणाः तेषां भागेन परमाणुमात्रेलेशेन विश्वोत्पत्त्यादयो भवंति तं त्वा गतिं शरणं ॥ श्रीकृष्णः ॥
॥ ९८ ॥

दैत्यराड् बलिः कथंभूतौ विश्वस्यात्मभूतं दैवं ३४ ३५ सान्वयः सपरिवारः संरंहः सपरिजनः पादाववनिज्य प्रक्षाल्य मूर्ध्ना दधार यदंबु पयो विरंचेने
र्जनोदकं आब्रह्म ब्रह्माणमभिव्याप्य जगत् पवित्रयद्वर्तते ३६ ३७ इंद्रसेनो बलिः प्रेमविभिन्नया प्रेमार्द्रया धिया बिभ्रत् धारयन् गद्गद
तरं यथा स्यात् प्रेम्णा जगाद ३८ अनंताय परेशाय बृहते फललोके हेशे विश्वधाम्नोऽनंत बृहत तस्मै कृष्णाय च वेधसे जगद्विधात्रे सांख्ययो

॥ श्रीऋषिरुवाच ॥ एवं संचोदितो मात्रा रामः कृष्णश्च भारत। सुतलं संविविशतुर्योगमायामुपाश्रितौ ३४ तस्मिन् प्र॥
॥ विष्टावुपलभ्य दैत्यराट् विश्वात्मदैवं सुतरां तथात्मनः। तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय ननाम सान्व॥
॥ यः ३५ तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः। दधार पादाववनिज्य तज्जलं सवृंद आब्रह्म पुन॥
॥ द्यदंबु ह ३६ समर्हयामास स तौ विभूतिभिर्महार्हवस्त्राभरणानुलेपनैः। तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्ता॥
॥ त्मसमर्पणेन च ३७ स इंद्रसेनो भगवत्पदांबुजं बिभ्रन्मुहुः प्रेमविभिन्नया धिया। उवाच हानंदजलाकुलेक्षणः प्रहृष्ट॥
॥ रोमा नृप गद्गदाक्षरं ३८ ॥ बलिरुवाच ॥ नमो नंताय बृहते नमः कृष्णाय वेधसे। सांख्ययोगवितानाय ब्रह्मणे पर॥
॥ मात्मने ३९ दर्शनं वां हि भूतानां दुःप्रापं चाप्यदुर्लभं। रजस्तमःस्वभावानां यन्नः प्राप्तौ यदृच्छया ४० दैत्यदानवगं॥
॥ धर्वाः सिद्धविद्याध्रचारणाः। यक्षरक्षःपिशाचाश्च भूतप्रमथनायकाः ४१ ॥ विशुद्धसत्त्वधाम्न्यद्धा त्वयि शास्त्रशरी॥
॥ रिणि। नित्यं निबद्धवैरास्ते वयं चान्ये च तादृशाः ४२ श्री॥

गवितानायेत्यादि पदत्रयमेकत्राविवक्षया योगेश्वराणामपि दुर्दर्शौ युवामस्माभिरीदृशैर्दृष्टाविति तत्र विस्मयमाह दर्शनमिति ३९ दुःप्रापमपि
सुलभं तु यथा केषांचिद्दुर्लभं तु लभमपि भवति तद्वत् रजस्तमःस्वभावानामपि नो दर्शनं प्राप्तौ अहो विदितु बोधयं सान्तिकमनत्कोऽपि तथा

बद्धवैरेण यावत्क्लिष्टा केचनेति चैद्यादयः कामतो भक्त्या गोप्यादयो संनिरुद्धाः तदा मतं प्राप्ताः तथा सत्त्वसंरब्धाः सत्त्वादिष्ठा अपि तु तादृशो न संनिरुद्धा इति न तु सात्विके स्थो पि तज्जसादयः संनिरुद्धा इति चित्रं तत्राह इदमित्थमिति इदमिति ४३ स्वरूपतः इत्थमिति विशेषतस्तत्र तदेवं यद्यपि देवेशस्तावेनापि त्वयाप्रिन्वितं यापि मा स्तां ततः किं कुर्वीतेति प्रार्थयते तन्न इति ४४ तत्तस्मान्नः प्रसीद यथा निरपेक्षैस्तत्र कामैरपि विमृग्यं युष्मत्पादारविन्दं तद्विषयधिषणा यस्य तस्मादन्यद्गृहं तदेवान्धकूपः तस्मान्निःक्रम्य निर्गत्य विश्वस्य शरणं रक्षिता

॥केचनोद्बद्धवैरेण भक्त्या केचन कामतः न तथा सत्त्वसंरब्धाः सन्निकृष्टाः सुतादयः ॥४३॥ इदमित्थमिति प्रायस्तव॥
॥योगेश्वरेश्वर न विदन्त्यपि योगेशा योगमायां कुतो वयं ॥४४॥ तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविन्दधिषणा॥
॥न्यगृहान्धकूपात् निःक्रम्य विश्वशरणाङ्घ्र्युपलब्धवृत्तिः शान्तो यथैक उत सर्वसखैश्चरामि ॥४५॥ साध्व्यस्मानदी॥
नीशितव्येशानिःपाप ॥ नेकृन्तनः प्रत्नोऽपमान्यपद्मद्यातिष्ठन्चोदनायाविमुच्यते ॥४६॥ श्री॥

तेऽरस्तात्तेषां मध्ये बुद्धत्वेषु सत एव गलितैः फलादिभिः तदुपलब्धा प्राप्ता वृत्तिर्जीविका येन सोऽहं शान्तः सन् एक एव चरामि उत अथवा स वैर्भागवतैः सख्यापायो यैर्महान्तस्तैः सह यथा चरामीति कथमस्मत्पुरुषोत्तमामेवं भावः तं न वक्तमस्तीति चेत् नाहं यथैव तद्यथैव दीनस्य पालनं ततः कृपयेत्याह साध्वीति ४५ हे प्रभो ईशितव्याः सर्वे जीवास्तेषामीश यत्तवात्तुशासनं प्रातिष्ठन्नाश्रयन् चोदनाया विधिनिषेधलक्षणाया सकाशाद्विमुच्यते न वै

तड्क्लौ [illegible] मनुवीपुत्र[illegible] मनकारणं स प्रपंचं कथयति आसन्निति पंचभिः प्रथमेंतरे स्वायंभुवमन्वंतरे मरीचेः ऊर्णायां भार्यायां षट्पुत्रा
आसन् ते देवाः सुतां वाचं यभितुं मैथुनेन रमयितुं उद्यतं उद्युक्तं कं प्रजापतिं जहसुः उपहसितवंतः ४७ तेनावद्यकर्मणा पापेन आसुरीं
योनिं अगमन् अधुना तत्क्षणमेव हिरण्यकशिपोर्जाता इत्यर्थः ते च योगमायया ततो नीताः संतो देवक्या उदरे जाताः ४८ हे राजन् बले
ते च कंसेन विहिंसिताः सा च तान् आत्मजान् मत्वा शोचति ते चेमे त्वां तिके अध्यासते ४९ प्रणेष्यामः देवक्याः सकाशं नेष्यामः यतः देवक्याः

॥श्रीभगवानुवाच॥ आसन्मरीचेः षट्पुत्रा ऊर्णायां प्रथमेंतरे। देवाः कं जहसुर्वीक्ष्य सुतां यभितुमुद्यतं ॥४७॥ ते
॥नासुरीमगमन्योनिमधुनावद्यकर्मणा। हिरण्यकशिपोर्जाता नीतास्ते योगमायया ॥४८॥ देवक्या उदरे जाता राज॥
॥न्कंसविहिंसिताः। सा तान् शोचत्यात्मजान् स्वांस्त इमेध्यासतेंतिके ॥४९॥ इत एतान् प्रणेष्यामो मातृशोका॥
॥पनुत्तये। ततः शापाद्विनिर्मुक्ता लोकं यास्यंति विज्वराः ॥५०॥ स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद्घृणी। षड्मे मत्॥
॥प्रसादेन पुनर्यास्यंति सद्गतिं ॥५१॥ इत्युक्त्वा तान् समादाय इंद्रसेनेन पूजितौ। पुनर्द्वारवतीमेत्य मातुः पुत्रान॥
॥यच्छतां ॥५२॥ तान् दृष्ट्वा बालकान् देवी पुत्रस्नेहस्नुतस्तनी। परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥५३॥
॥अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नुता। मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्तते ॥५४॥ पीत्वामृतं पय॥
॥स्तस्याः पीतशेषं गदाभृतः। नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥५५॥ ते नमस्कृत्य गोविंदं देवकीं पि॥
॥तस्याः पीतशेषं गदाभृतः। नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥५५॥ ते नमस्कृत्य गोविंदं देवकीं पि॥
।तरं बलं। मिषतां सर्वभूतानां ययुर्धाम दिवौकसां ॥५६॥

नयानात् शापाद्विनिर्मुक्ताः लोकं देवलोकं ५० स्मरोद्गीथः सुसहितः उद्गीथः सद्गतिं मोक्षं स्मरस्येव पूर्वं कीर्तिमानिति नाम स्मृतः कीर्तिमंतं
प्रथमजं कंसायानकदुंदुभिः दर्पयामास ते सुताः ५१ अयच्छतां अर्पयामासतुः ५२ ५३ ५४ अमृततत्त्वे हेतुः गदाभृतः पीतशेषमिति ना
रायणांगसंस्पर्शप्रतिलब्धं देवा वयमिति आत्मदर्शनं येषां ते ५५ धाम देवलोकं ५६

भा॰ द॰ उ॰
२००

रतानामागमनं निर्गमं च ॥ श्रीकृष्णस्य मायां मेने ॥ नैनैवायस्तादिरूपेण रचितां ॥५७॥ अनन्तं कीर्तिर्यस्य तस्य व्यासपुत्रैरिति बहुवचनं पूजार्थं जगतः
अघं जिनत्तीति तथा तत् ॥ अलं निःशेषं यथा भवति तथा तत्कर्णपूरमिति ॥ तदेव मोक्षहेतुत्वं पहृदयहेतुत्वं चोक्तं तद्भक्तानां तु सत्कर्णपूरं सुख
वहं कर्णभूषणमिति स्वरूपं स्वरूपतामाह किंच भगवति कृतमावेशितं चित्तं येन स तथाभूतः तस्य तेन धाम कालादिभिरप्रतिहतं लोकं या
तीति ॥५९॥ इति श्रीभागवते दशमे पञ्चाशीतितमोऽध्यायः ॥८५॥ षडशीतितमे भ्रातास्तु सुभद्रामर्जुनो हरत् गत्वा च मिथिलां कृष्णोऽन्वपविप्रावनं

१ देवी

तं दृष्ट्वा देवकी मृतागमननिर्गमं ॥ मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ॥५७॥ एवंविधान्यद्भुतानि कृष्णस्य परमात्मनः ॥
वीर्याण्यनन्तवीर्यस्य सन्त्यनन्तानि भारत ॥५८॥ सूत उवाच ॥ य इदमनुशृणोति श्रावयेद्वा मुरारेश्चरितममृतकी
र्तेर्वर्णितं व्यासपुत्रैः ॥ जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृतचित्तो याति तत्क्षेमधाम ॥५९॥ इति श्रीभागवते म
हापुराणे दशमस्कन्धे मृताग्रजानयनं नाम पञ्चाशीतितमोऽध्यायः ॥८५॥ श्रीराजोवाच ॥ ब्रह्मन्वेदितुमिच्छामः स्वसा
रं रामकृष्णयोः ॥ यथोपयेमे विजयो या ममासीत्पितामही ॥१॥ श्रीशुक उवाच ॥ अर्जुनस्तीर्थयात्रायां पर्यटन्नवनीं प्रभुः ॥
गतः प्रभासमशृणोन्मातुलेयीं स आत्मनः ॥२॥ दुर्योधनाय रामस्तां दास्यतीति न चापरे ॥ तल्लिप्सुः स यतिर्भूत्वा त्रिदण्डी द्वा
रकामगात् ॥३॥

यत् ॥१॥ पित्रोः स्वज्ञानमाश्रिपृच्छ कृष्णेनाप्य जगाम मिथिलां कृष्णः ॥ स्वभक्तप्रियकृत्तमः ॥२॥ देवकामतश्च बलात् अर्जुनस्य सुभद्रा
लाभोऽपि रामप्रतिकूल्यात् दुर्घट इति मन्यमानः प्रसंगात् पृच्छति ब्रह्मन्निति कथामशृणोत् दुर्योधनायेति ॥२॥ अपरे वसुदेवादयो न दास्य
न्तीति तां लिप्सुः प्राप्तुमिच्छुः रामं वंचयितुं पूज्यं तमां त्रिदण्डवेषं विधाय गतः इत्याह स यतिरिति ॥३॥ श्रीकृष्ण:
२००

समाति ... ध्येन निमंत्र्य गृहमानीय बलेन यघूद्रुपोपहृतं परिविष्टं तद्वै संकिलाजुंनो भुभुज इत्यन्वयः ५ मावेनग्र
न्यानिश्राधयणोहृत्जितं मनोरधे ६ व्रीडितापांगा तव्रीडकृ याह्लालस्मिन्ने वन्यस्तं हृदयमीहृणं च यया सा ७ अंतरं हतुमवसरं प्रेप्सुः प्राप्तमि
षुः कामे नव्यमर्षितं यस्य सः सतमादिसन्मान निमित्तं सुखे ८ ९ आसमंताद्रुंधतः शवरलोकं कुर्वतः १० ११ फाद्विवहीलिवरवेध्वो प्रतिदेयामि
॥तत्रवैवार्षिकोमोसान्यवासी स्वार्थसाधकः पौरैः सम्माजितोभीहृणं तमेरोजा न तोचसः ४ एकदा गृहमानीयगृश्रा॥
॥तिथ्येन निमंत्र्य तं श्वद्रुपोपहृतं नैवेद्यं बलेन बुभुजे किल ५ सोपश्यत्तत्र महतीं कन्यां वीमेनोहृती प्रीतिस्पृहे तृणालस्पा॥
॥मावत्कुंद्रमनोरधे ६ स्थापितं चकमे योषित्नारीणां हृदयंगमं हसंतीं व्रीडितापांगीं तन्यस्त हृदये हृणं ७ तां परं समनुध्या॥
॥यंस्तु तंत्र प्रेप्सुरजनिः न लेभे संभ्रमश्चितः कामेनातिबलीयसा ८ महत्सांदेवयात्रायां रथस्थां दुर्गनिर्गतां जहारतु॥
॥मतः पित्रोः सख्यस्य च महात्मनः ९ रथस्योधनुरादाय शूरांश्चारुंधतोमयान् विशब्द्य क्रोशतां स्वानां स्वभागं मृगरा॥
॥डिव १० तच्छ्रुत्वा घुन्नितो रामः पर्वणीव महार्णवः गृहीतपादः कृष्णेन सुहृद्भिश्चान्वशाम्यत ११ प्राहिलोसाविवर्हा॥
॥स्रोवरवेध्वोर्मुहाबलः महाधनोपस्कौभरथ्याश्वनरयोषितः १२ ॥श्रीशुक उवाच॥ कृष्णस्यासीत् द्विजश्रेष्ठः श्रु॥
॥तदेव इतिश्रुतः कृष्णैकमनत्यापूर्णार्थः शांतः कविरलंपटः १३ स उवास विदेहेषु मिथिलायां गृहाश्रमी अनीहया॥
॥गतार्थ निवर्तितनिजक्रियः १४ यात्रामात्रं त्वहरहर्दैवादुपनमत्युत नाधिकं तावता तुष्टः क्रियाश्चक्रे यथोचिताः १५

१२ १३ अनीहया अनुद्यमेनैवागतं यदाहार्यं भोज्यं तेन निवर्तिताः संपादिता निजाः क्रियाः पंचयज्ञाद्यो येन सः १४ यात्रामात्रं श
रीरादिनिर्वाहमात्रं भोज्यं उपनमति तं प्रत्यागच्छति १५ श्रीकृष्णायनमः श्रीरामोहरायनमः श्रीकृष्णायनमः श्रीकृष्णायनमः

भा॰ १॰ ३॰
१०१

मिथिलस्य जनकस्य वंश्यो मैथिलः १६ प्रभुरेव स्वयं विदेहान् देशान् प्रययौ १७ कृष्णो व्यासः रामो भार्गवः १८ अहं शुकः एवमादिभिः
सह १८ १९ आनर्त्तादिर्जना तद्दृशा वर्त्तिनो नृप नार्यः ३ उदारहासं स्निग्धमीक्षणं यस्मिन् तत्तद्दृशो नेत्रैः २० स्ववीक्षणेनैव विनष्ट
तथा तद्राष्ट्रपालोऽङ्ग बहुलाश्व इति श्रुतः मैथिलो निरहंमान उभावप्यच्युतप्रियौ १६ तयोः प्रसन्नो भगवान् दारुकेणाहृतं
रथं आरुह्य साकं मुनिभिर्विदेहान् प्रययौ प्रभुः १७ नारदो वामदेवोऽत्रिः कृष्णो रामोऽसितोऽरुणिः अहं बृहस्पतिः कण्वो
मैत्रेयश्च्यवनादयः १८ तत्र तत्र तमायान्तं पौरा जानपदा नृपाः उपतस्थुः सार्घ्यहस्ता ग्रहैः सूर्यमिवोदितं १९ आनर्त
धन्व कुरुजांगलकंक मत्स्य पांचाल कुंति मधु केकय कोशलार्णाः अन्ये च तन्मुखसरोजमुदारहास स्निग्धे
क्षणं नृप पपुर्दृशिभिर्नृनार्यः २० तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन्
शृण्वन् दिगंतधवलं स्वयशोऽशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् २१ तेऽच्युतं प्राप्तमाकर्ण्य पौरा ज
नपदा नृपाः अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः २२ दृष्ट्वा तं उत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः कैर्धृतां
जलिभिर्नेमुः श्रुतपूर्वं यथा मुनीन् २३ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गुरुं मैथिलः श्रुतदेवश्च पाद
योः पेततुः प्रभोः २४ न्यमंत्रयेतां दाशार्हमातिथ्येन सह द्विजैः मैथिलः श्रुतदेवश्च युगपत्संहतांजली २५

३ ता

तमिस्रा दृग्भ्यो यांतेभ्यः क्षेमं कुर्वन् अर्थदृशं तत्वज्ञानं च २१ अभीयुः प्रत्युज्जग्मुः २२ प्रीत्या उत्फुल्लानि आननानि आशया अंतःक
[illegible] २५ श्रीकृष्णाय नमः श्रीरामाय नमः श्रीद्वारका[illegible] श्रीकृष्ण[illegible]य नमः श्री राधा[illegible]
[illegible] रामं वन्दे

श्रीकृष्णः
१०१

[illegible] कं न्यां प्रेक्षः ४ तमाति [illegible] भ्याम पिताभ्यां मकृहाद्दत्स्वगेहं यातीत्यलक्षितः [illegible] दिति [illegible] उभाभ्यां तत्पाभ्यां तदलक्षि
तः ताभ्यामलक्षितः २६ २७ उद्धर्षं हृदयं यस्य अस्रैराविले क्षिणे ईक्षणे यस्य सः २८ एवं सच ईश्वरान् ईश्वरं तत्तुल्यांश्चेत्यर्थः

भगवांस्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया उभयोराविशद्गेहमुभाभ्यां तदलक्षितः २६ श्रोतुमप्यसतां दूराज्ज
नकः स्वगृहागतान् आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः २७ प्रवृद्धभक्त्या उद्धर्षहृदयोस्राविलेक्षणः
नत्वा तदंघ्रीन्प्रक्षाल्य तदपो लोकपावनीः २८ सकुटुंबो वहन्मूर्ध्ना पूजयांचक्र ईश्वरान् गंधमाल्यांबराकल्प
धूपदीपार्घ्यगोवृषैः २९ वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान् पादावंकगतौ विष्णोः संस्पृशन्शनकै
र्मुदा ३० राजोवाच भगवान्हि सर्वभूतानामात्मा साक्षी स्वदृक् प्रभो अथ नस्त्वत्पदांभोजं स्मरतां दर्शनं ग
तः ३१ स्ववचस्तदृतं कर्तुमस्मद्दृग्गोचरो भवान् यदात्थैकांतभक्तान्मे नानंतः श्रीरजः प्रियः ३२ को नु त्वच्चर
णांभोजमेवंविद्विसृजेत्पुमान् निःकिंचनानां शांतानां मुनीनां यस्त्वमात्मदः ३३ यो वतीर्य यदोर्वंशे नृणां सं
सरतामिह यशो वितेने तच्छांत्यै त्रैलोक्यवृजिनापहं ३४ नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे नारायणा
य ऋषये सुशांतं तप ईयुषे ३५ दिनानि कतिचिद्भूमन्गृहान्नो निवस द्विजैः समेतः पादरजसा
पुनीहीदं निमेः कुलं ३६ इत्युपामंत्रितो राज्ञा भगवान्लोकभावनः उवास कुर्वन्कल्याणं मिथिलानरयो
षितां ३७

२९ प्रीणन् प्रीणयन् संस्पृशन् तं मेने इत्यन्वयः ३० आत्मा चेतयिता साक्षी प्रकाशकः स्वदृक् स्वप्रकाशः ३१ अथ अस्मत्तः कारणात् अनंतो बं
धुरपि श्रीर्भार्यापि अजः पुत्रोपि न प्रियः यथा भक्ताः ३२ ३३ ३४ तच्छांत्यै संसारोपरमाय ३५ गृहान् गृहे स्थित्यर्थः ३६ ३७ ३७

मा॰ १३॰
१०२

पुच्छन् परिभ्रमयन् ॥३८॥ स्ववनिजे प्रक्षालितवान् ॥३९॥४०॥ फलैरामलकादिभिर्दृश्येन उशीरैः लवङ्गविशेषमूलैः सुवासितैः शिवैर्मेन्त्रवस्त्राद्भिरेव भिः तुलस्या चन्दनकस्तूरीप्रमुखैर्यासपर्यया पूजया यथोपपन्नया ॥ तान् पद्मवलध्याचोसरत्नचविवर्द्धनं पदंध ॥ अन्नेनैतेनच ॥४१॥ अथ स्वः सूस्यात्मा सूर्तिलस्यानि केतैर्भक्तैरन्तर्वर्तीर्थास्यहृयाहरेणुभिः ॥ सुसादिभिर्धैः ॥ संगमः समममकुतोन्वतूहीतिश्चन्वितिविस्मयेयदाश्चाइतिवितर्के

॥ श्रुतदेवो च्युतं प्राप्तं स्वगृहान् जनको यथा ॥ नत्वा मुनीन् संहृष्टो धुन्वन् वासो ननर्त्त ह ॥३८॥ धन्योऽहं स्तनकृतोऽहं ॥
॥ सफलामे मनोरथाः ॥ दर्शनं दुर्लभं यस्य स देवो मे पुरःस्थितः ॥३८॥ स्मरतां कीर्तिनं यस्य महापातकनाशनं ॥ सोयं मां ॥
॥ कृपया देव ईहतेतिननर्त्तह ॥४०॥ तत एपीठ दर्भी बेतानानीतेषूपवेश्य सः ॥ स्वागतेनाभिवंद्याग्नीन् सभार्यो वनिजे मु ॥
॥ दा ॥४१॥ तदंभसा महाभाग आत्मानं सगृहान्वयं ॥ स्नापयांचकुरुत्त हर्षो लब्धसर्वमनोरथः ॥४१॥ फलार्हणोशीरशिवा ॥
॥ मृतांभसा मृदा सुरभ्या तुलसीकुशांबुजैः ॥ आराधयामास यथोपपन्नया सपर्यया सत्त्वविवर्द्धनांधसा ॥४२॥ सत ॥
॥ र्कयामास कुतो ममान्वभूत् गृहांधकूपे पतितस्य संगमः ॥ यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन वास्यात्मनिकेत ॥
॥ भूसुरैः ॥४३॥ सूपविष्टान् कृतातिथ्यान् श्रुतदेव उपस्थितः ॥ सभार्यः स्वजनापत्य उवाचांघ्र्यभिमर्शनः ॥४४॥ श्रुतदेव उ ॥
